उतथ्यानुजः, पुं, (उतथ्यस्यानुजः ।) वृहस्पतिः । इति त्रिकाण्डशेषः ॥ (यथा माघे २।६९ ।
"तथ्यामुतथ्यानुजवत् जगादाग्रे गदाग्रजम्" ॥)

उतथ्यानुजन्मा, [न्] पुं, (उतथ्यस्य अनुजन्मा अनुजः ।) वृहस्पतिः । इति भूरिप्रयोगः ॥

उताहो, व्य, (उत च आहो च अनयोः समाहारः ।) परिप्रश्नः । विचारः । इति मेदिनी ॥ विकल्पः । इत्यमरः ॥
("त्वमा खित् प्रेयसी तात! उताहो तेज इत्युत" । यक्षी वा राक्षसी वा त्वं उताहोऽसि सुराङ्गना" ॥ इति च महाभारते ॥)

उताहोस्वित्, व्य, उताहो । विकल्पः । इत्यमरटीका ॥ ("अन्यद्दप विदधातीह गर्भमुताहोस्वित् स्वेन कायेन याति" । इति महाभारते ॥)

उत्कः, त्रि, (उद्गतं मनो यस्य । उत् + कन् ।) उन्मनाः । अन्यमनस्कः । इत्यमरः ॥
("तत् श्रुत्वा ते श्रवणसुभगं गर्ज्जितं मानसोत्काः" । इति मेघदूते । ११ । तथा कुमारे । ६ । ९५ ।
"अगमयदद्रिसुतासमागमोत्कः" ॥)

उत्कटं, त्रि, (उद्गतः कटः आवरणं आवरको वा यस्य ।) तीव्रम् । मत्तम् । इति मेदिनी ॥ विषमम् । इति शब्दरत्नावली ॥ (यथा रामायणे ५ काण्डे ।
"चन्द्रांशुनिकराभासा हाराः कासाञ्चिदुत्कटाः । स्तनमध्ये सुविन्यस्ता विरेजुर्हंसपाण्डराः" ॥)

उत्कटं, क्ली, गुडत्वक् । तेजपात इति ख्यातं इति केचित् । इत्यमरभरतौ ॥ दारचिनि । इति ख्यातम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायानाह भावप्रकाशे पूर्व्वखण्डे,
"त्वक्पत्रञ्च वराङ्गं स्याद् भृङ्गञ्चोदन्तमुत्कटम्" ॥)

उत्कटः, पुं, (उद्गतमदकत्तेः उत्कशब्दात् स्वार्थे समोदश्चेति कटच् ।) मदः । इति शब्दरत्नावली ॥ स्रंसातमदहस्ती । इति हारावली ॥ शरः । इक्षुः । इति राजनिर्घण्टः ॥

उत्कटा, स्त्री, (उद्गतः कटो यस्याः ।) सैंहलीलता । इति राजनिर्घण्टः ॥

उत्कण्ठः, पुं, (उद्गतः कण्ठो यस्य ।) शृङ्गारस्य षोड़शबन्धान्तर्गतचयोदशबन्धः । आसन यस्य प्रसिद्धिः तस्य लक्षणम् ।
"नारीपादौ च हस्तेन धारयेद्दूलके पुनः । स्तनार्पितकरः कामी बन्धश्चोत्कण्ठसंज्ञकः" ॥ इति रतिमञ्जरी ॥

उत्कण्ठा, स्त्री, (उत् + कठि + अ + टाप् ।) उत्कलिका । इष्टलाभे कालक्षेपासहिष्णुता । इत्यमरः ॥ कामादिजातस्मृतिः । इति भरतः ॥ उद्वाकुलकेन स्मरणम् । इति मधुः ॥ उत्केन दयितस्मरणम् । इति सुभूतिः ॥ प्रियाभिलाषादुन्मनस्त्वं । इत्यन्ये ॥
("गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालाम्" । इति मेघदूते । ८३ ।
"यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया" । इति शाकुन्तले । ४ र्थे अङ्के ॥)

उत्कण्ठितं, त्रि, (उत्कण्ठा जातास्य । उत्कण्ठा + इतच् ।) उत्कण्ठायुक्तम् । तत्पर्य्यायः । उत्कं २ उन्मनः ४ । इति हेमचन्द्रः ॥
("सास्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन" । इति मेघदूते । १०३ ॥)

उत्कण्ठिता, स्त्री, (उत्कण्ठा सञ्जातास्याः । उत्कण्ठा + इतच् + टाप् ।) स्वीयादिनायिकाभेदः । अस्याः लक्षणम् ।
"सङ्केतस्थलं प्रति भर्त्तुरनागमनकारणं चिन्तयति या" ।
अस्याश्चेष्टाः अरति-सन्ताप-जृम्भाङ्गाक्षि-कम्प-रुदित-श्वासावस्थाकथनादयः । इति रसमञ्जरी ॥
(इयमेव विरहोत्कण्ठिता । यदुक्तं साहित्यदर्पणे तृतीयपरिच्छेदे ।
"आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः । तदागमनदुःखार्त्ता विरहोत्कण्ठिता तु सा" ॥
तत्रैव । १० परिच्छेदे अपह्नुतेरुदाहरणम् । यथा,—
'उत्कण्ठितासि तरले!
नहि नहि सखि! पिच्छिलः पन्थाः' ॥)

उत्कता, स्त्री, (उत्कस्य भावः । उत्क + तल् ।) गजपिप्पली । इति शब्दचन्द्रिका ॥ उत्कस्य भावः । उत्कण्ठा ॥

उत्करः, पुं, (उत्कीर्य्यते इति । उत् + कॄ + अप् ।) धान्यादिराशिः । स्तूपः । इत्यमरः ॥
("सिक्तराजपथान् रम्यान् प्रकीर्णकुसुमोत्करान्" । इति रामायणे ॥)

उत्कर्षः, पुं, (उत् + कृष् + घञ् ।) अतिशयः । इत्यमरः ॥ (प्राधान्यं । श्रेष्ठता । यथा, "उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले" । इति शाकुन्तले २ य अङ्के ।
"निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्" । इति मनुः ४।२४४ ॥ वृद्धिः । यथा,—
"पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः" । इति रघुः । ४ । ११ ।) अतिशययुक्ते त्रि ॥ स्वकालात् परकालकर्त्तव्यः । इति स्मृतिः ॥

उत्कलः, पुं, (उत् + कल + अच् ।) ओड्रदेशः । इति त्रिकाण्डशेषः ॥ उड़िष्या इति भाषा । व्याधः । इति शब्दमाला ॥ पाखिमारा इति भाषा ।
("उत्कलादर्शितपथः कलिङ्गाभिमुखं ययौ" । इति रघुवंशे ४।३८ ॥ सुद्युम्नतनयः स्वनामख्यातो राजा । यदुक्तं महाभारते ।
"सुद्युम्नस्य तु दायादास्त्रयः परमधार्म्मिकाः । उत्कलश्च गयश्चैव विनताश्वश्च भारत! ॥ उत्कलस्योत्कला राजन् विनताश्वस्य पश्चिमा" ॥)

उत्कलं, त्रि, (उत् + कल + अच् ।) भारवाहकम् । इति शब्दमाला । मुटे इति भाषा ॥

उत्कलिका, स्त्री, (उत् + कल + वुन् + टाप् ।) उत्कण्ठा । इत्यमरः ॥
("ततोऽन्येद्युः प्रतिपदं तत्तदुत्कलिकाभृता" । कथासरित्सागरे । २२।१०५ ।) कलिका । इति त्रिकाण्डशेषः ॥ ("उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणात्" । इति रत्नावली ।) तरङ्गः । ("वनावलीरुत्कलिकासहस्रप्रतिक्षणो-त्कूलितशैवलाभाः" । इति माघः । ३ । ७० ।) हेला । इति हेमचन्द्रः ॥

उत्कलितः, त्रि, (उत् + कल + क्त ।) उन्मनाः । वृद्धिमान् । इति धरणी ॥ (उत्कण्ठितः ॥)

उत्का, स्त्री, (उद्गतं मनो यस्याः । उत् + कन् + टाप् ।) उत्कण्ठिता नायिका । इति रसमञ्जरी ॥

उत्काका, स्त्री, (उत्का + अक + अच् + टाप् ।) प्रतिवर्षप्रसूता गौः । इति शब्दचन्द्रिका ॥

उत्कारः, पुं, (उत्कीर्य्यते इति । उत् + कॄ + घञ् ।) धान्योत्क्षेपणम् । तत्पर्य्यायः । निकारः २ । इत्यमरः ॥ धान झारा इति भाषा । धान्यस्य राशीकरणं वा । इति भरतः ॥

उत्कूटं, क्ली, (उत् + कूट् + क ।) उत्तानशयनम् । इति हारावली ॥ चित् हइया शोया इति भाषा ।

उत्कुणः, पुं, (उत् + कुण + क ।) केशकीटः । उकुण इति भाषा । तत्पर्य्यायः । मत्कुणः २ कोणकुणः ३ उद्दंशः ४ किटिभः ५ । इति हेमचन्द्रः ॥

उत्कूटः, पुं, (उन्नतं कूटमस्य ।) छत्रम् । इति हारावली ॥

उत्कृष्टं, त्रि, (उत् + कृष् + क्त ।) उत्कर्षविशिष्टम् । अतिशययुक्तम् । प्रकृष्टम् । प्रशस्तम् । यथा,—
"उत्कृष्टमध्यमनिकृष्टजनेषु मैत्री,
यद्वत् शिलासु सिकतासु जलेषु रेखा ।
वैरं क्रमादधममध्यमसज्जनेषु,
यद्वत् शिलासु सिकतासु जलेषु रेखा" ॥
इत्युद्भटः ॥ (कर्षणवत्क्षेत्रादिः ॥)

उत्कृष्टभूमः, पुं, (उत्कृष्टा प्रशस्ता भूमिर्यस्मिन् ।) प्रशस्तभूमिः । इति जटाधरः ॥

उत्कोचः, पुं स्त्री, (उत्कोचति अशुभं नाशयतीति । उत् + कुच + क ।) घुस् इति ख्यातः । तत्पर्य्यायः । प्राभृतं २ ढौकनं ३ लञ्चा ४ कौशलिकं ५ आमिषं ६ उपाचारः ७ प्रदा ८ आनन्दा ९ हारः १० ग्राह्यं ११ अयनं १२ । इति हेमचन्द्रः ॥ उपदानकं १३ । इति त्रिकाण्डशेषः ॥ अपप्रदानं १४ । इति भूरिप्रयोगः ॥ (यथा, याज्ञवल्क्ये १ । ३ ॥ ३८ ।
"उत्कोचजीविनो द्रव्यहीनान् कृत्वा प्रवासयेत्" ।)

उत्क्रमः, पुं, (उत् + क्रम + अच् ।) व्यतिक्रमः । विपरीतिः । तत्पर्य्यायः । व्युत्क्रमः २ अक्रमः ३ । इति हेमचन्द्रः ॥

उत्क्रोशः, पुं स्त्री, (उत्क्रोशति प्रहरे प्रहरे शब्दं करोतीति । उत् + क्रुश + अच् ।) कुररपक्षी । इत्यमरः ॥

उत्क्षिप्तः, पुं, (उद् + क्षिप + क्त ।) धुस्तूरफलम् । इति शब्दचन्द्रिका । ऊर्द्ध्वक्षिप्ते त्रि ॥

उत्क्षिप्तिका, स्त्री, (उत् + क्षिप् + क्तिन् + कन् + टाप् ।) कर्णभूषणविशेषः । तत्पर्य्यायः । कर्णान्दुः २ । इति हेमचन्द्रः ॥

उत्क्षेपणं, क्ली, (उत् + क्षिप् + ल्युट् ।) व्यजनम् । धान्यमर्द्दनवस्तु । इति मेदिनी ॥ उद्वमनम् । ऊर्द्ध्वक्षेपणम् ।
("अतिमात्रलोहिततलौ बाहू घटोत्क्षेपणात्" इति शाकुन्तले प्रथमाङ्के ।) षोड़शपणम् । इति